# हे प्रभो!



**मह्यम्** सद्बुद्धिम् **यच्छ**,
सत्कार्याणि **करिष्यामि**।



मह्यम् शरीरबलम् प्रयच्छ,
अन्येषाम् रक्षाम् करिष्यामि।





मह्यम् मधुरवाणीम् प्रयच्छ,
सदैव मधुरम् **वदिष्यामि**।



मह्यम् श्रवणशक्तिम् प्रयच्छ,
हितवचनानाम् श्रवणम् करिष्यामि।

***एषः पाठः केवलं प्रार्थना-रूपेण कक्षायां सस्वरं पठनाय न तु अभ्यासाय।***

---

**शब्दार्थ–मह्यम्**=मुझे (to me), **यच्छ**=दो (give), **करिष्यामि**=करूँगा/करूँगी ((I) will do), **वदिष्यामि**=बोलूँगा/बोलूँगी ((I) will speak)

**प्रथमः पाठः**

# मधुरा प्रभातवेला





अहा! **मधुरा** प्रभातवेला। आकाशे सूर्यः उदितः। अन्धकारः गतः। सर्वत्र प्रकाशः एव प्रकाशः **अस्ति**। पक्षिणः आकाशे **अत्र-तत्र** भ्रमन्ति। वृक्षेषु वानराः कूर्दन्ति। जनाः प्रसन्नाः **सन्ति**। **ते** उद्यानेषु भ्रमन्ति धावन्ति च। बालाः **अपि** उद्यानेषु क्रीडन्ति। पशवः अपि प्रसन्नाः सन्ति। ते वनेषु अत्र-तत्र गच्छन्ति। **सर्वे** जनाः **स्वकार्येषु** संलग्नाः भविष्यन्ति।

अहा! धन्या **एषा** सुखदायिनी प्रभातवेला।

---

**शब्दार्थ–मधुरा**=सुहावनी (pleasant), **अस्ति**=है (is), **अत्र-तत्र**=यहाँ-वहाँ (here-there), **सन्ति**=हैं (are), **ते**=वे (they), **अपि**=भी (too), **सर्वे**=सब (all), **स्वकार्येषु**=अपने कामों में (in their own works/jobs), **एषा**=यह (एक) (स्त्रीलिङ्ग)(this (one)) (feminine)

## अभ्यासः

1. **चित्राणि दृष्ट्वा रिक्तस्थानानि पूरयत–**

(क) आकाशे ................................ उदितः।



(ख)



................................ आकाशे उड्डयन्ति।

(ग) ................................ क्रीडन्ति।



(घ)



................................ वृक्षेषु कूर्दन्ति।

2. **उदाहरणम् पठित्वा प्रश्नानाम् उत्तराणि लिखत 'आम्' अथवा 'न'–**

**उदाहरणम्–**किम् प्रभातवेला मधुरा अस्ति? ........आम्........

(क) किम् सूर्यः प्रभातवेलायाम् उदितः भवति? ........................

(ख) किम् प्रातः वानराः अपि प्रसन्नाः भवन्ति? ........................

(ग) किम् बालाः उद्यानेषु क्रीडन्ति? ........................

(घ) किम् वानराः आकाशे भ्रमन्ति? ........................

(ङ) किम् प्रभातवेला सुखदायिनी अस्ति? ........................

3. **चित्रं दृष्ट्वा वदन्तु लिखन्तु च सत्यम्/असत्यम् वा–**



**यथा–** सूर्यः उदितः अस्ति। ........सत्यम्.......

(क) वानराः वृक्षस्य अधः सन्ति। ........................

(ख) बालकाः धावन्ति। ........................

(ग) पुष्पाणि सन्ति। ........................

(घ) द्वौ कुक्कुरौ स्तः। ........................

**4. चित्रं दृष्ट्वा वदन्तु 'आम्' अथवा 'न'–**

**किं चित्रे–**

(क) पर्वतः अस्ति?

(ख) नदी अस्ति?

(ग) हंसः अस्ति?

(घ) सिंहः अस्ति?

(ङ) बालः अस्ति?

(च) कुक्कुरः अस्ति?

(छ) नौका अस्ति?

(ज) पत्रम् अस्ति?

(झ) बालिका अस्ति?

(ञ) वृक्षः अस्ति?




**5. उपरिदत्तं चित्रं दृष्ट्वा नामानि लिखन्तु–**

(क)  ..............................................................

(ख) ..........................................................



(ग)



..........................................................

(घ) ..........................................................





(ङ) ..........................................................

**द्वितीयः पाठः**

# मम परिवारः

**निशा** – मधुर! अत्र आगच्छ। पश्य, **इदम्** चित्रम्।

(मधुरः चित्रम् पश्यति)



**मधुरः** – अहा! इदम् मम चित्रम् अस्ति।

**निशा** – भवान् कथम् अवगच्छति?

**मधुरः** – पश्यतु एषः अहम्।

**निशा** – एषः कः?



**मधुरः** – एषः मम पिता।

**निशा** – एषा का?

**मधुरः** – एषा मम माता।

**निशा** – एषः कः?

**मधुरः** – एषः मम अनुजः।

**निशा** – एषः कः?



**मधुरः** – एषः मम ज्येष्ठः भ्राता।

**निशा** – मधुर! अधुना **अवगच्छामि** एषः तव पिता, एषा तव माता, एषः तव अनुजः, एषः ज्येष्ठः भ्राता।

---

**शब्दार्थ–इदम्**=यह (एक) (this (one)), **अवगच्छामि**=समझता हूँ/समझती हूँ ((I) understand)

## अभ्यासः

**1. अधोलिखितानि रिक्तस्थानानि पूरयन्तु–**



(क) एषः कः अस्ति?

.............................. पुरुषः अस्ति।



(ख) एषा का अस्ति?

.............................. महिला अस्ति।



(ग) एषः कः अस्ति?

.............................. चिकित्सकः अस्ति।



(घ) एषा का अस्ति?

.............................. चिकित्सिका अस्ति।



(ङ) एषः कः अस्ति?

.............................. नर्तकः अस्ति।



(च) एषा का अस्ति?

.............................. नर्तकी अस्ति।



(छ) एषः कः अस्ति?

.............................. अध्यापकः अस्ति।



(ज) एषा का अस्ति?

.............................. अध्यापिका अस्ति।

**2. चित्राणि दृष्ट्वा रिक्तस्थानानि पूरयन्तु–**

(क) एषः ........................... अस्ति?

एषः लेखकः अस्ति।

लेखकः किम् करोति?

........................... लिखति।



(ख) एषा ........................... अस्ति?

एषा महिला अस्ति।

महिला किम् करोति?

........................... पचति।



(ग) एतत् ........................... अस्ति?

एतत् फलम् अस्ति।

किम् फलम् पतति?

आम् ........................... पतति।



(घ) एषः ........................... अस्ति?

एषः सैनिकः अस्ति।

सैनिकः किम् करोति?

........................... देशम् रक्षति।



3. चित्रे किं किम् अस्ति इति वदन्तु लिखन्तु च–

..............................

..............................

..............................

..............................

..............................

..............................

..............................

..............................

..............................

..............................

..............................

..............................

..............................

..............................

..............................




4. किं भवतः/भवत्याः गृहे 'अस्ति/नास्ति' इति लिखन्तु–

(क) लेखनी अस्ति? ........................ (घ) चित्रम् अस्ति? ........................

(ख) घटः अस्ति? ........................ (ङ) दर्पणः अस्ति? ........................

(ग) द्वारम् अस्ति? ........................ (च) पादत्राणम् अस्ति? ........................

5. **नामानि लिखत–**

(क)  ..........................................................



(ख) ..........................................................

(ग)  ..........................................................



(घ) ..........................................................

(ङ)  ..........................................................



(च) ..........................................................

**तृतीयः पाठः**

# वयम् पश्यामः जन्तुशालाम्

**नवीनः, प्रवीणः, समृद्धिः, नीना च एकदा भ्रमणाय गच्छन्ति।**




**नवीनः** – एषा का अस्ति?

**प्रवीणः** – एषा जन्तुशाला अस्ति।

**नवीनः** – किम् अत्र अनेके जीवाः सन्ति?

**प्रवीणः** – आम्, अत्र अनेके जीवाः सन्ति।

**नवीनः** – ते किम् कुर्वन्ति?

**प्रवीणः** – पश्य तत्र–

सिंहः गर्जति,<br>
अश्वः धावति,<br>
गजः चलति,<br>
मृगः शीघ्रम् धावति,<br>
वानरः खादति,<br>
अजः चरति।







(तदा समृद्धिः नीना च **आगच्छतः**।)



**समृद्धिः** – एते के सन्ति?

**नीना** – एते खगाः सन्ति।

**समृद्धिः** – खगाः किम् कुर्वन्ति?

**नीना** – एषः मयूरः नृत्यति, एषः शुकः खादति, पिकः कूजति, कपोतः उत्पतति, उलूकः तिष्ठति, सा सारिका गायति।







(सर्वे भ्रमन्ति।)

**नवीनः** – तत्र किम् अस्ति?

**प्रवीणः** – तत्र सरोवरः अस्ति।

**नवीनः** – एते के तरन्ति?

**प्रवीणः** – एते जलजीवाः तरन्ति।

**नवीनः** – अत्र मकरः, मण्डूकः, कच्छपः, मीनः च अनेके जीवाः सन्ति।



---

**शब्दार्थ–आगच्छतः**=(दो लोग) आते हैं ((two persons) come)

## अभ्यासः

1. चित्रम् ध्यानेन पश्यन्तु, लिखितानि नामानि पठन्तु च।




एते सर्वे पशवः अस्माकं मित्राणि सन्ति।

2. **अधुना लिखन्तु एते के?**

(क)  एषः.......................................................अस्ति।

(ख) एषः.............................................अस्ति। 

(ग)  एषः.............................................अस्ति।

(घ) एषः.............................................अस्ति। 

(ङ)  एषः.............................................अस्ति।

(च)  एष:.......................................अस्ति।



(छ) एषा.......................................अस्ति।

(ज)  एष:.......................................अस्ति।



(झ) एष:.......................................अस्ति।

(ञ)  एष:.......................................अस्ति।

3. **उदाहरणम् पठित्वा रिक्तस्थानानि पूरयन्तु–**

**उदाहरणम्** – यः वृक्षे कूर्दति सः ..................वानरः..................

(क) यः तीव्रं धावति सः ........................................

(ख) यः वनराजः अस्ति सः ........................................

(ग) यः भारं वहति सः ........................................

(घ) यः मरुस्थले सहायकः भवति सः ........................................

(ङ) यः शनैः शनैः चलति सः ........................................

4. **अधोलिखितानि पदानि उचित-स्तम्भे लिखत–**

| | | | | | |
|---|---|---|---|---|---|
| गजः, | सिंहः, | वानरः, | उष्ट्रः, | अश्वः, | व्याघ्रः, |
| भल्लूकः, | गर्दभः, | धेनुः, | अजा, | मूषकः, | विडालः |

| | **वनवासिनः पशवः** | **अन्ये पशवः** |
|---|---|---|
| **यथा–** | ........सिंहः........ | ........मूषकः........ |
| | .......................... | .......................... |
| | .......................... | .......................... |
| | .......................... | .......................... |
| | .......................... | .......................... |
| | .......................... | .......................... |

5. **उचित-शब्देन मेलनं कुरुत–**

| | | |
|---|---|---|
| (क) | सिंहः | चपलः |
| (ख) | अश्वः | दुग्धप्रियः |
| (ग) | गर्दभः | धावकः |
| (घ) | गजः | स्थूलः |
| (ङ) | कुक्कुरः | भारवाहकः |
| (च) | विडालः | पराक्रमी |
| (छ) | वानरः | स्वामिभक्तः |



6. **अधः प्रदत्तस्थाने स्वप्रियपशोः चित्रं रचयित्वा तत् चित्रं वर्णैः रञ्जयन्तु–**

चतुर्थः पाठः

# शाकहट्टम्




**सुधा** – रजत! चित्रे किम् पश्यसि?

**रजतः** – चित्रे अहम् फलानि पश्यामि।

**श्यामा** – अत्र कानि फलानि सन्ति?

**रजतः** – अत्र पपीतकः, द्राक्षाफलम्, नारङगम्, नारिकेलं च सन्ति।

**रजनीशः** – किम् एतानि एव फलानि सन्ति?

**सुधा** – नहि, तरबूजम्, सेवम्, दाडिमम् इत्यादयः अपि सन्ति।

**श्यामा** – किम् चित्रे केवलं फलानि एव सन्ति?

**रजनीशः** – नहि, तत्र शाकाः अपि सन्ति।

**रजतः** – किम् त्वम् शाकानाम् नामानि अपि जानासि?

**रजनीशः** – आम्, अत्र पुष्पशाकम्, पलाण्डुः, कारवेल्लः, वृन्ताकः, अंगुलितोरिका आलुकम् च इत्यादयः शाकाः सन्ति।

## मिलित्वा गायन्तु, अवगच्छन्तु आचरन्तु च

**अभिवादनशीलस्य नित्यं वृद्धोपसेविनः।**
**चत्वारि तस्य वर्धन्ते आयुर्विद्या यशोबलम्॥**



**भावार्थः**

यः बालकः प्रतिदिनं मातरं, पितरं, गुरुजनान्, ज्येष्ठान् च नमति, वृद्धानां च सेवां करोति, एतेषाम् आशीर्वादेन तस्य बालकस्य आयुः वर्धते, ज्ञानं वर्धते, यशः वर्धते, शक्तिः च वर्धते।